PAGE NO.

DATE: / /

# ओ३म्

## एको रसः करुण एव

कारुण्यं जगतो मूलं काव्यमूलं निसर्गतः ।
करुणार्द्रस्य स्वान्तस्य रससिद्धिरनुत्तमा ॥

**करुणस्य स्वरूपम् →**

किं नाम जीवितम् ? जीवितं हि पञ्चष-दिनानां सुखानुभूतिः, भूयसां च वासराणां दुःखानुभूतिः। जीवने सुखदुःखयोः, हर्षसुखयोः, मित्रशत्रुत्वयोः, संभोग-विप्रलम्भयोः समन्वयो दरीदृश्यते। नहि सुखव्यतिरिक्तं दुःखम्, सुखं च दुःखव्यतिरिक्तम् । चक्रवद्द्वयोः परिवर्तन-वृत्तित्वम्। जगतो नश्वरतां प्रेक्ष्य तत्त्वज्ञैः तदसारताप्रतिपादनात् निवृत्तिमार्गः प्रस्तावितः। जीवनं शोकबहुलम्, इष्टनाश- अनिष्टप्राप्त्यादिप्रसंगात् ।

**करुणस्य वैविध्यम् →**

करुणरसे शोक एव स्थायिभावत्वेनाश्रियते। करुणो हि रसः चित्तद्रवताम् आपाद्य लोकहृदयेन साधारणीकरणं विदधाति। करुणस्य एव क्वचिद् दयाभावेन, क्वचित् सहानुभूतिरूपेण, क्वचित् समवेदनात्वेन समन्वितं सद् नानारूपत्वं वैविध्यं चाप्नोति। दुःखमूलके सुखे, विप्रलम्भमूलके संभोगे, शोकमूलके हर्षे, परदुःखकातरताजन्य सहानुभूतौ, इष्टनाशानन्तरजातसन्ततौ वात्सल्ये, विनष्टेष्टजनापत्ये वीरत्वे, ~~वियोगदुःखान्त~~ च करुणस्यैव प्राधान्यम् ।

एवमेव सर्वेऽपि रसाः करुणरसे निबद्धाः। करुणमूलत्वम् उद्वीक्ष्यैव सर्वेषां रसानां भवभूतिना उद्घोष्यते यत् —

एको रसः करुण एव निमित्तभेदात्
भिन्नः पृथक् पृथगिव श्रयते विवर्तान्।
आवर्त-बुद्बुद -तरङ्गमयान् विकारान्,
अम्भो यथा सलिलमेव हि तत् समस्तम् ॥

भवभूतेरभिमतं सर्वेषां रसानां करुणमूलत्वम्। करुणरसादेव सर्वेषां रसानां आविर्भावः। यथा सलिलमेकमेव सद् भूम्यादिरूपेण नानाभेदान् आपद्यते, तथैव करुणो रसोऽपि वैविध्यं प्रतिपद्यते। स एव क्वचित् करुणरसः, क्वचित् विप्रलम्भशृङ्गारः, क्वचिच्च रसान्तरम्।

करुणरसात् काव्योत्पत्ति →

करुणरसे चित्तद्रवीभावः। स एव काव्यस्य मूलम्। नान्तरेण चित्तद्रवत्वं ~~चित्त~~ चित्तद्रवत्वं तात्त्विकी सात्त्विकी अनुभूतिः। नैसर्गिकं चित्तद्रवत्वमेव करुणभावावेगे काव्यं आविर्भावयति। अतएव काव्यस्योत्पत्तिरपि करुणमूलैव उद्गीर्यते। क्रौञ्चद्वन्द्ववियोगजन्यं कारुण्यं आश्रित्यैव महाकवेर्वाल्मीकेः प्रथमा अभिव्यक्तिः—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥